इत्यत्र वन्ध्यासुतादीनां बाह्यार्थरहितत्वेऽपि बुद्धिपरिकल्पितं वन्ध्यासुत-शब्दवाच्यार्थमादायार्थवत्त्वात् प्रातिपदिकत्वम्, अन्यथार्थवत्त्वाभावे प्रातिपदिकत्वाभावात् स्वाद्युत्पत्तिर्न स्यात्।

यत्तु तार्किकैः—श्रृङ्गे शशीयत्वभ्रमः, इत्यभिहितं तन्नोचितम्, शशशब्द-वाच्यजन्तुदर्शनरूपबाधे सति शशश्रृङ्गो नास्ति इति वाक्ये शशश्रृङ्गमित्यस्य—प्रातिपदिकत्वानापत्तेः। अर्थपदयोस्तादात्म्यात् तत्तदर्थतादात्म्यापन्नः शब्दो भिन्न इति हेतोः अर्थभेदाच्छब्दभेद इति व्यवहारः। समानाकारमात्रेण तु एकोऽयं शब्दो बह्वर्थं इति व्यवहारः।

**( ५ ) प्रश्नः—साध्वसाधुषु शब्देषु शक्तेः सत्त्वं समर्थयत।**

**उत्तरम्**—सेयं शक्तिः तेनैव प्रकारेणापभ्रंशेष्वपि शब्देषु भवति येन प्रकारेण साधुषु शब्देषु शक्तिग्राहकशिरोमणेर्व्यवहारस्योभयत्र तुल्यत्वात् व्यवहारदर्शनेन च पूर्वजन्मानुभूतशक्तिस्मरणम्। अत एव बालानां तिरश्चां चान्वयबोधः। न हि तेषां तदेव तत्सम्भवः।

असाधुशब्देन साधुस्मरणद्वारार्थबोध इत्याहुर्यत् तार्किकाः तन्नोचितम्, साधुशब्दस्मरणं विनाप्यर्थबोधस्य दर्शनात्। तद्वाचकसाधुशब्दमजानन्तोऽपि तान् तानपभ्रंशशब्दान् श्रुत्वा अर्थमगच्छन्त्येव। न च साधुशब्देषु शक्तिभ्रमाद् बोधो भवतीति वाच्यम्, निस्सन्देहप्रत्ययस्य बाधकं विना भ्रमत्वासम्भवात्। अत एव स्त्रीशूद्रबालादीनामुच्चारिते साधावर्थसंशये तदपभ्रंशेनार्थनिर्णयः। अत एव 'समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः' इति भाष्यम्।

'वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः' इति हरिकारिका च सङ्गच्छते। अत एव चार्यम्लेच्छाधिकरणसमन्वयः।

तत्र हि यद्यपि आर्या यवशब्दं दीर्घशूके प्रयुञ्जते, म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते, तमेव च बुध्यन्ते, तथाप्यार्यप्रसिद्धेर्बलवत्त्वाद् वेदे दीर्घशूकपरतैवेति सिद्धान्तितम्। नैयायिकानां तु म्लेच्छबोधस्य शक्तिभ्रममूलकत्वेन भ्रान्तिविषय-रजतज्ञानस्येव म्लेच्छप्रसिद्धेर्वस्त्वसाधकतयाऽऽर्यम्लेच्छप्रसिद्धयोः कस्याबलवत्त्व-मिति विचारासङ्गतिः स्पष्टैव। साधुत्वं हि व्याकरणान्वाख्येयत्वरूपम् अथवा पुण्यजनकतावच्छेदकत्वरूपं भवति। साधुत्वभिन्नत्वं चासाधुत्वम्।

**( ६ ) प्रश्नः—शक्तेर्भेदान् सोदाहरणं निरूपयत।**

**उत्तरम्**—शक्तिः त्रिप्रकारवती भवति—रूढिः, योगः योगरूढिश्च। तत्र—शास्त्रकल्पितावयवार्थमानाभावे समुदायार्थनिरूपितशक्तिः रूढिः; यथा—

Scanned with CamScanner

**प्रश्न: १०— स्फोटस्य के अष्टौ भेदा: सन्ति?**

उत्तरम्— वर्ण–पद–वाक्य भेदेन स्फोटस्त्रिधा। प्रत्येक भेदस्य जातिव्यक्तिभेदात् षोढा भवति स्फोटः, अखण्ड पदस्फोट: अखण्डवाक्यस्फोटश्चेति अष्टौ स्फोट भेदा: भवन्ति।

**प्रश्न: ११— स्फोटशब्दस्य कोऽर्थ:?**

उत्तरम्— स्फुटत्यर्थो अस्मादिति स्फोट:।

अथवा— स्फुट्यते ऽभिव्यज्यते वर्णैरिति स्फोट:।

**प्रश्न: १२— वर्णस्फोटेन किं भवति?**

उत्तरम्— शास्त्र प्रक्रियाया: निर्वाहो भवति।

**प्रश्न: १३— वर्णस्फोटस्य कोऽर्थ:?**

उत्तरम्— प्रकृति प्रत्ययास्तत्तदर्थ वाचका इति तदर्थ:।

**प्रश्न: १४— गौतममतेन कति प्रमाणानि?**

उत्तरम्— प्रत्यक्षानुमानोपमानशब्दा: इति चत्वारि प्रमाणानि।

**प्रश्न: १५— शब्द प्रमाणस्य किं स्वरूपम्?**

उत्तरम्— शब्दश्चाप्तोपदेशरूप: प्रमाणम्

**प्रश्न: १६— क आप्त:?**

उत्तरम्— आप्तो नाम अनुभवेन वस्तुतत्त्वस्य कात्स्न्येन निश्चयवान्।

**प्रश्न: १७— शाब्दबोधम्प्रति को हेतु:?**

उत्तरम्— तद् धर्मावच्छिन्न विषयक शाब्द बुद्धित्वावच्छिन्नम् प्रति तद् धर्मावच्छिन्न निरूपित वृति विशिष्टज्ञानं हेतु:।

**प्रश्न: १८— नागेश: वृत्ते: कति भेदान् स्वीकरोति?**

उत्तरम्— नगेश: वृत्ते: त्रीन् भेदान् स्वीकरोति।

**प्रश्न: १९— वृत्ते: त्रयो भेदा: के?**

उत्तरम्— शक्ति:, लक्षणा व्यञ्जना चेति।

**प्रश्न: २०— नैयायिकाऽनुसारेण शक्ते: स्वरूपं किम्?**

उत्तरम्— अस्माच्छब्दादयमर्थो बोद्धव्य: इत्याकारा शक्ति:।

इदं पदमिमर्थं बोधयन्तु इत्याकारा ईश्वरेच्छा वा शक्ति:।

**प्रश्न: २१— संकेत: शक्तेर्भिन्न: अभिन्नो वा?**

उत्तरम्— संकेत एव शक्ति:। सैव पदपदार्थयो: संबन्धश्च।

Scanned with CamScanner